VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

# ।। उपनिषत्सु विश्वप्रार्थनाः ।।

**प्रो. डॉ. मयुरीबेन भाटिया**

भाषासाहित्यभवन,
गुजरात विश्वविद्यालय ।

अधुना वयं पश्यन्तः स्मः यदद्य अनेकविधानि नूतनानि पूर्वमननुमितानि तादृशानि भौतिकानि यन्त्राणि उपकरणानि च संशोधितानि । अतः संपूर्णविश्वः प्रगतेः पथि धावतीति प्रतिभाति । तथापि वयं प्रतिदिनं समाचारपत्रे पठामः कुत्रचिद् हत्या जाता कुत्रचिद् अकस्माद् जातं कुत्रचिद् महाकलहः जातः एवं हिंसायाः अपि प्रमाणं तेनैव वेगेन वर्धमानं दृश्यते । समाजे शान्तिस्थापनार्थ तस्य अवरोधनम् आवश्यकम् । तदर्थं मानवता नैतिकता शान्तता मूल्यशिक्षा च आवश्यकी । एवमेतत्परिवर्तनं शीघ्रं कर्तुं नैव शक्यते अपि तु शनैः शनैः लघुलघुप्रयासैः अल्पारंभेण तच्छक्यम् । तत्रापि यदि वयमस्माकं स्तरे किंचित् कर्तुमिच्छामः तर्हि विश्वप्रार्थना प्रथमसोपानरूपेण ग्रहीतुं शक्यते ।

प्रकर्षेण अर्थ्यते याच्यते अनया सा प्रार्थना । अस्माकं परम्परया वयं कस्यापि कार्यक्रमस्य प्रारम्भः प्रार्थनया एव कूर्मः । प्रार्थना गेया भवति यतो हि मनः प्रफुल्लितं भवति एवं तस्याः भावाः अपि तादृशाः यैः चितं विशुद्धं भवति । किन्तु अद्य सा परम्परा लुप्ता जायमाना प्रतीयते । तस्य कारणं कदाचिद् प्रार्थनायां विद्यमानं धर्मसापेक्षत्वं भवितुमर्हति । एवं निखिले विश्वस्मिन् शान्तिं स्थापनार्थं धर्मनिरपेक्षा प्रार्थना आवश्यकी । अत एव विश्वप्रार्थना | विश्वस्य प्रार्थना विश्वप्रार्थना । तादृश्याः विश्वप्रार्थनायाः अभावो नास्ति ताः उपनिषत्सु सन्त्येव । तासु एव काश्चिद् प्राथनाः उदाहरणरूपेण प्रस्तोतुमहं भवतां पुरतः उपस्थितः । तत्र प्रप्रथममीशोपनिषदः प्रथमो मन्त्रो यथा-

**ईशावास्यमिदं सर्व यत्किञ्चिद् जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥**[1]

अर्थात् विश्वस्मिन् सर्वमपि ईश्वरेण व्याप्तमस्ति । अत्र "ईश ऐश्वर्ये" धातोरस्माद् व्युत्पन्नः शब्दो न तु देवविशेषवाचकः अपि तु शक्तिविशेषः । अर्थाद् बहुविधविशेषताभिः परिपूर्णस्य अस्य जगतः पृष्ठे काचिदूर्जा वर्तते यया अस्य नियन्त्रणं क्रियते तया व्याप्तमिति भावः । तत्तु विज्ञानमपि स्वीकरोति । एवं यत्किमपि अस्माभिः लभ्यते तस्य त्यागभावेन भोगः कर्तव्यः । यदि लब्धवस्तु कदाचिद् न तिष्ठति तदा शोको न करणीयः । अन्यस्य धनस्य लोभेन विना अस्माकं पार्श्वे यदस्ति तेन सन्तोषः प्राप्तव्यः । साथ एषा उदारभावना विश्वस्य कृते उत्तमा प्रार्थना भवितुं प्रभवति ।

तदनन्तरं येन वयं जीवितुं शक्नुमः अस्माकं शरीरमिदं कार्यं कर्तुं च शक्नोति तदन्नमपि अस्माभिः प्रार्थनीयं स्यात् । मनुष्याः यदा अस्वस्थाः भवन्ति तदापि अन्नमेव औषधरूपेण गृहणन्ति । नैकेषु अल्पाहारगृहेषु भोजनभवनेषु विवाहप्रसङ्गेषु विविधेषु उत्सवेषु च अन्नं अधिकमात्रायामवशिष्टं भवति दुर्व्ययं च भवति । अन्यत्र दरिद्राः जनाः बुभुक्षिताः एव शयनं कुर्वन्ति । एवमन्नस्य सदुपयोगः स्यात् तदर्थं जनाः अन्नन्स्य महत्त्वेन परिचेतव्याः । तत् प्रार्थनया सरलरीत्या कर्तुं शक्यते । सा प्रार्थना तैत्तिरीयोपनिषदि प्रदत्ता यथा-

[1] ईशोपनिषद्-१ ।

http://vidyajournal.org

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

**अन्नाद्वै प्रजाः जायन्ते । याः काश्च पृथिवीं श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः । अन्नं हि भूतानां ज्येष्ठम् | तस्मात् सर्वोषधमुच्यते ।**[2]

"सवे गुणाः काञ्चनमाश्रयन्ते सूक्तिमिमां सार्थकीकुर्वन्तो जनाः अत्र तत्र धावन्ति । धनमेव जीवनं मन्वते । किन्तु तथापि शान्तिं सुखमानन्दं च न प्राप्नुवन्ति । वयमपि निरीक्षणं कुर्मः धनवन्तो जनाः सुखेन शयितुं न शक्नुवन्ति निर्धनारच संतोष प्राप्य आनन्दीभूय गादनिद्रायां गच्छन्ति । स आनन्दः एव आवश्यकः यस्य कृते वयं आदिनं उद्यमं कूर्मः । अस्माकं जीवनस्य अन्तिमलक्ष्यमानन्दः एव भवति । विश्वस्मिन् कस्य देशस्य कियान् विकासः सञ्जातः तदर्थं मानव विकास सूचकांकः निर्मीतः । तत्र वयं बहु पृष्ठे स्मः । तत्र भूतानदेशः सर्वाधिकप्रगति प्राप्तवान् इति मन्यते । कारणं तस्मिन् आनन्दस्य अपि गणना भवति । तत्र भूतानदेशः सर्वाधिकः दरिद्रः परं सर्वाधिक सुखी देशः अस्ति । तावत् तत्र दूरदर्शनमपि विंशतिशताब्द्यां आगतम् । एतत्सम्बद्धा प्रार्थनापि अस्माकमुपनिषदि प्राप्यत एव । यथा-

**आनन्दो ब्रह्मेति व्यजानात् | आनन्दध्येव खल्विमानि भूतानि जायन्ते | आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति ।**[3]

अस्मिन् युगे केचिद् जनाः सफलता केचिच्च निष्फलतामपि प्राप्नुवन्ति । परन्तु निष्फलतामवाप्य जनाः निराशामनुभवन्ति । ते प्रोत्साहनीयाः भवन्ति निष्फलतानान्तरं पुनः उद्युक्ताः भवेयुः तदर्थं प्रेरणीयाश्च भवन्ति । एवं तस्य कृते सर्वाधिक महत्वपूर्ण ज्ञानं भवति । ज्ञानमार्गः कश्चित् कठिनः तथापि न अशक्यम् इति उद्बोधितव्याश्च भव । स्वामिविवेकानन्दमहाभागः अपि कथयतिस्म "उत्तिष्ठत जाग्रत ध्येयप्राप्तिं यावत् उद्युक्ताः भवत" । वयं जानीमः तेनापि उपनिषदामध्ययनं कृतमस्ति । ततः एव विचारोयमुद्भुतः । वाक्यमिदं च कठोपनिषदः विद्यते । एषापि एका प्रेरणाप्रदायिका प्रार्थना भवितुं शक्यते । सा यथा-

**उत्तिष्ठत जाग्रत प्राप्यवरान्निबोधत ।**
**क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत कवयो वदन्ति ।।**[4]

"सङ्घे शक्तिर्कलौ युगे' अस्य अनुसरणमिदानी हिंसाः स्थगितुं बहु आवश्यकम् । सङ्घः एव भारतं भातुं शक्नोति । विश्वबन्धुत्वं च विश्वमुन्नेतुं समर्थम् । तादृश्वा भावनाया जनमानसेषु स्थापनमनिवार्यम् | उपनिषत्सु बहुत्र शान्तिपाठाः पठिताः । तत्र एकस्मिन् मन्त्रे एतादृशो भावो विद्यते । यथा-

**सह नाववतु । सह नौ भुनक्तु । सहवीर्यं करवावहै । तेजस्विनावधीतमस्तु । मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ।।**[5]

अर्थात् आवयोः साकं रक्षणं पालनं शक्तिवर्धनं च करोतु । यत्किमपि ज्ञातं तद् भासयतु । कस्यापि द्वेषं न स्यातावत् पूतमनासौ भावयतु । एषापि एका आदर्शप्रार्थना स्यात् । एवामेतादृशीनां विश्वप्रार्थनानां निधिः अस्माकमेव उपनिषत्सु विद्यमानाः सन्ति । याभिः विश्वस्यास्य कल्याणार्थमुपयुक्ताः भवितुमर्हन्तीति भावः ।

---

[2] (तैतिरीयोपनिषद्. व.२. अनु. २. म.१.)

[3] (तैतिरीयोपनिषद्. व. ३. अनु. ६. म. १. )

[4] (कठो. व. ३. अ.१. म. १४ . )

[5] शान्तिपाठः

http://vidyajournal.org